देवेश त्रैलोक्यतिमिरापहम् ॥ २ ॥ इति दीपम् ॥ अन्नपतेन्नस्यनोदेह्यनमीवस्यशुष्मिणः प्रप्रदातारंतारिषऽऊर्ज्जंन्नोधेहिपदेचतुष्पदे ॥ १ ॥ अन्नं चतुर्विधं स्वादुरसैः षड्भिः समन्वितम् ॥ भक्ष्यभोज्यसमायुक्तं नैवेद्यं प्रतिगृह्यताम् ॥२॥ इति नैवेद्यम् ॥ आचमनं च॥ ॐ याः फलिनीर्य्याअफलाऽअपुष्पायाश्चपुष्पिणीः ॥ बृहस्पतिप्रसूतास्तानोमुंचंत्वꣳहसः ॥ १ ॥ इदं फलं मया देव स्थापितं पुरतस्तव ॥ तेन मे सकलावाप्तिर्भवेज्जन्मनि जन्मनि ॥२॥ इति फलम् ॥ पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम् ॥ कर्पूरादिसमायुक्तं तांबूलं प्रतिगृह्यताम् ॥ १ ॥ इति तांबूलम् ॥ ॐ हिरण्यगर्भः समवर्त्तताग्रेभूतस्यजातः पतिरेकऽआसीत् ॥सदाधारपृथिवींद्यामुतेमांकस्मैदेवायहविषाविधेम॥१॥हिरण्यगर्भगर्भस्थं हेम बीजं विभावसोः ॥ अनंतपुण्यफलदमतः शांतिं प्रयच्छ मे ॥१॥ इति दक्षिणाम् ॥ चंद्रादित्यौ चधरणी विद्युदग्निस्तथैव च ॥ त्वमेव सर्वज्योतींषि आर्तिक्यं प्रतिगृह्यताम् ॥ इति नीराजनम् ॥ नमस्ते पुंडरीकाक्ष नमस्ते ह्यमरप्रिय ॥ नमस्ते कमलाकांत

से दीपक 'अन्नपते० ' से नैवेद्य तथा आचमन 'याः फलिनी० से फल 'पूगीफलं० 'से तांबूल ' हिरण्यगर्भ ' से दक्षिणा 'चन्द्रादित्यौ० , से नीराजन ' नमस्ते पुंडरीकाक्ष०' से पुष्पां-

वासुदेव नमोऽस्तु ते ॥ १ ॥ इति पुष्पांजलिं दद्यात् ॥ यानि कानि च पापानि ब्रह्महत्यासमानि च ॥ तानि तानि विनश्यंतु प्रदक्षिणपदेपदे ॥१॥ इति प्रदक्षिणा ॥ नमः सर्वहितार्थाय जगदाधारहेतवे ॥ साष्टांगोऽयं प्रणामस्तु प्रयत्नेन मया कृतः ॥ १ ॥ इति नमस्कारः ॥ ततो यजमानस्य तिलकं कृत्वा कंकणं बध्नीयात् ॥इति प्रधानपूजनविधिः ॥८६॥ ततः सिद्धे चरौ ज्वलत्तृणादि चर्वाज्ययोरुभयोरुपरि भ्रामयित्वा वह्नौ तत्प्रक्षेपः । ततः स्रुवप्रतपनं त्रिः ॥ ततः संमार्जनकुशानामग्रैरंतरतो मूलैर्बाह्यत स्रुवं संमृज्य प्रणीतोदकेनाभ्युक्ष्य पुनस्त्रिः प्रतप्य दक्षिणतः कुशोपरि निदध्यात् ॥ ततः आज्यमग्नितश्चरोः पूर्वेणानीयाग्रे धृत्वा आज्यपश्चिमेन चरुमानीयाज्यस्योत्तरतो निदध्यात् ॥ ततः पवित्राभ्यामाज्ये

जलि और ' यानिकानि० ' से प्रदक्षिणा तथा 'नमः सर्व०' से नमस्कार करे । इसके पीछे यजमानके तिलक करके राखी बाँधे ॥ ८६॥ " होमका आरंभ " उपरोक्त पूजापाठ आदि हुऐ पीछे होमकी वेदीके पास अपने अपने आसनोंपर बैठकर चरु तयार होगये पीछे आचार्य एक दर्भाको जलाकर चरु और घी पर उसको घुमाके अग्निमें पटक दे । फिर स्रुवको तीन बार तपावे ओर संमार्जनकुशाओंसे उसके बाहर भीतर आगे पीछे सब जगहसे साफ करके प्रणीताके जलसे धोकर

प्रोक्षणीवदुत्पवनम् अवेक्ष्य सत्यपद्रव्ये निरसनम् ॥ ततःपूर्ववत्प्रोक्षण्युत्पवनंततउत्थायोपयमनकुशानादाय प्रजापतिं मनसा ध्यात्वा तूष्णीं घृताक्ताः समिधस्तिस्रः अग्नौ क्षिपेत् ॥ समिधोऽभ्यादायः स्वाहा ॥८७॥ अथो पविश्य सपवित्रप्रोक्षणीजलेनसहविष्कमग्निं प्रणीताब्रह्म सहितं प्रदक्षिणक्रमेण पर्युक्ष्य पवित्रे प्रणीतापात्रे धृत्वा प्रोक्षणीपात्रं स्वस्थाने निदध्यात् ॥ ब्रह्मणाऽन्वारब्धः पातितदक्षिणजानुः स्रुवेणाज्याहुतीर्जुहुयात् ॥ ८८ ॥ तत्र आहुतिचतुष्टये प्रत्याहुत्यनंतरं स्रुवावस्थित-

---

फिर तपावे । और अपने दहिने ओर दर्भापर रखदे । फिर तपाया हुआ घी और पकायी हुई खीर अपने पास रखकर घीको स्वच्छ करे । और पहलेकी भांति प्रोक्षणीका उत्पवन करके उठकर उपयमन कुशाओंको बाँये हाथमें लेवे और ब्रह्माका मनमें ध्यान करके वे पहले वाली तीनों समिधायें चुप चाप घी में भिगोकर 'स्वाहा' कहकर अग्निमें पटक दे ॥ ८७ ॥ फिर बैठकर पवित्र सहित प्रोक्षणीजलको हवि, अग्नि प्रणीता और ब्रह्मा इन सबके चारों ओर प्रद-क्षिणा क्रमसे डालकर पवित्रेको प्रणीतापत्रमें रखदे और प्रोक्षणी को अपनी जगह रख दे। फिर ब्रह्माका अन्वारब्ध (छुए हुए) करके दहनी जंघा दबाकर स्रुवमें घीकी आहुति होमे ॥ ८८ ॥ आगेकी चारों आहुतियोंमें प्रत्येकके होमे

हुतशेषघृतस्य प्रोक्षणीपात्रे प्रक्षेपः ॥ आघारावाज्य-भागौ तु जुहुयात्पंचवारुणम् । समिदाज्यचरोर्होम-तिलहोमक्रमेण च ॥ १ ॥ सर्वत्र होमाहुतौ प्रणवं पूर्वमु-च्चार्य स्वाहाकारांतो होमः कार्यः ॥ यथादैवतं चतुर्थ्यंतं न ममेति त्यागं च कुर्यात् ॥ ८९॥ ततः समिद्धतमेऽग्नौ ॐ प्रजापतये स्वाहा इदं प्रजापतये न मम ॥ १ ॥ इति मनसा । ॐ इंद्राय स्वाहा इदमिन्द्राय न मम ॥ २ ॥ इत्याघारौ । ॐ अग्नये स्वाहा इदमग्नये० ॥ १ ॥ ॐ सोमाय स्वाहा इदं सोमाय न मम ॥ २ ॥ इत्याज्यभागौ । ततोऽनन्वारब्धः स्थालीपाकेन होमः॥ ॐ प्रजापतये स्वाहा इदं प्रजापतये न मम इति मनसा ॥ ततोऽन्वारब्धो जुहुयात् ॥ तत्त-दाहुत्यनंतरं स्रुवावस्थितहुतशेषस्य प्रोक्षण्यां प्रक्षेपः ॥

पीछे शेष घीको प्रोक्षणी पात्रमें पटके। स्मरण रहे कि समिधा घी खीर और तिल यह चारों पदार्थ चार पात्रोंमे पृथक् पृथक् रखकर प्रत्येक आहुतिमें इन चारोंपदार्थोंकी आहुति दीजिये और आहुति देते समय ॐ आदिमें और स्वाहा अंतमें उच्चा-रण किया जाय। होमके सब द्रव्य शुद्ध और घृताक्त (घीमें भीगे हुए) हों तथा प्रत्येक आहुतिमें शुद्ध उच्चारण रहे ॥८९॥ इस प्रकार सावधान होकर समिधा लगी हुई प्रज्वलित अग्निमें 'ॐ प्रजापतये स्वाहा' आदि आहुति देकर 'शान्तिके वरद-

शांतिके वरदनाम्ने वैश्वानराय इदमावाहनं इदमत्र चंदनं पुष्पं च॥ततः ॐवरुणस्योत्तंभनमसिव्वरुणस्यस्कंभसर्ज्जनीस्थो वरुणस्यऽऋतसदन्यसिव्वरुणस्यऋतसदनमसिवरुणस्यऋतसदनमासीद ॥ १ ॥ ॐ वरुणाय स्वाहा इदं वरुणाय न मम ॥९०॥ अथ ग्रहाणां समिधः॥ अर्कः पलाश खदिर अपामार्गोऽथ पिप्पलः ॥ उदुंबरः शमी दूर्वा कुशाश्च समिधः क्रमात् ॥१॥ अलाभे तु प्रकर्तव्याः सर्वाः पालाशवृक्षजाः ॥ प्रतिग्रहं च जुहुयाच्छतमष्टोत्तरं तथा ॥ २ ॥ अष्टाविंशतिरष्टौ वा यजेत्पंचामृतप्लुताः॥ प्रथमं प्रत्येकमेकैकाज्याहुतिं हुत्वा पश्चात्प्रत्येकमष्टोत्तरशतसंख्याकाभिरष्टाविंशतिभिरष्टभिर्वातिलधान्याज्याहुतिभिः समिद्भिर्जुहुयात्॥९१॥ अथहोममंत्राः ॥ आकृ-

---

नाम्ने० से अग्निका आवाहनादि पूजन करके ' ॐ वरुणस्योत्तं० ' से फिर एक आहुति दे ॥९०॥ इसके पीछे आक पलाश खैर अपामार्ग (औधा कांटा) पीपल गूलर खेजडा दूर्वा और दर्भ यह सूर्यादि नौ ग्रहोंकी समिधें इकट्ठी करके उनको पंचामृतमें डुबोकर रखदे। और फिर सूर्य आदि नौ ग्रहोंके " आकृष्णे० " आदि मंत्रोंसे प्रत्येक ग्रहकी तिल घी खीर और समिध इनकी एकसौ आठ या अट्टाईस अथवा आठ आठ आहुति दे, स्मरण रहे कि आहुति देनेवाले ब्राह्मण मंत्रोच्चारण करते रहें ॥ ९१ ॥ ' होम ' " आकृष्णे० " से

ष्णेति मंत्रस्य हिरण्यस्तूपांगिरस ऋषिः सविता देवता त्रिष्टुप्छंन्दः आदित्यप्रीतये तिलधान्याज्यार्कसमिद्धोमे विनियोगः॥ ॐ आकृष्णेनरजसावर्त्तमानोनिवेशयन्न- मृतंमर्त्यंच ॥ हिरण्ययेनसवितारथेनादेवोयातिभुवना निपश्यन् ॥ आदित्याय स्वाहा इदमादित्याय० ॥ १ ॥ इमं देवा इति मंत्रस्य वरुणऋषिः सोमो देवता सोमप्रीतयेतिलधान्याज्यपालाशसमिद्धोमेविनियोगः। ॐ इमन्देवाऽअसपत्नर्ठंसुवध्वम्महतेक्षत्राय महते ज्यैष्ठ्यायमहतेजानराज्यायेन्द्रस्येन्द्रियाय इममसुष्य पुत्रममुष्यैपुत्रमस्यै व्विशऽएषवोऽमीराजा सोमोऽस्माकं ब्राह्मणानाᳬराजा ॥ सोमाय स्वाहा इदं सोमाय० ॥२॥ अग्निम्मूर्द्धेति मंत्रस्य विरूपाक्षऋषिः अंगारको देवता- गायत्रीच्छंदःभौमप्रीतयेतिलधान्याज्यखदिरसमिद्धोमे विनियोगः ॥ ॐअग्निर्म्मूर्द्धादिवः ककुत्पतिः पृथिव्या ऽअयम् ॥ अपाᳬरेताᳬसिजिन्वति॥भौमाय स्वाहा इदं भौमाय० ॥ ३ ॥ उद्बुध्यस्वेति मंत्रस्य परमेष्ठी ऋषिःबुधो देवता त्रिष्टुप्छंदःबुधप्रीतयेतिलधान्याज्या पामार्गसमिद्धोमे विनियोगः ॐ उद्बुध्यस्वाग्ने प्रति- जागृहित्वमिष्टापूर्तेसर्ठंसृजेथामयंच॥ अस्मिन्त्सधस्थेऽ

सूर्याय स्वाहा कहकर आहुति दे। "इमंदेवा०" से सोमाय स्वाहा "अग्निर्मूर्द्धा०" से भौमाय "उद्बुध्य०" से

अध्युत्तरस्मिन्विश्वेदेवायजमानश्चसीदत॥ ॐ बुधाय स्वाहा इदं बुधाय० ॥४॥ बृहस्पते इति मंत्रस्य गृत्समदऋषिः बृहस्पतिर्देवता त्रिष्टुप्छंदः बृहस्पतिप्रीतये तिलधान्याज्यपिप्पलसमिद्धोमे विनियोगः॥ ॐबृहस्पते अतियदर्य्योऽअर्हाद्युमद्विभातिक्रतुमज्जनेषु॥यद्दीदयच्छवसऋतप्रजाततदस्मासुद्रविणंधेहिचत्रम् ॥ॐबृहस्पतये स्वाहा इदं बृहस्पतयेनमम।५।अन्नात्परिस्रुतइतिमंत्रस्य अश्विसरस्वतींद्रा- ऋषयः शुक्रो देवता त्रिजगतीच्छन्दः शुक्रप्रीतये तिलधान्याज्योदुंबरसमिद्धोमे विनियोगः॥ ॐ अन्नात्परिस्रुतोरसंब्रह्मणाव्यपिबत्क्षत्रं पयः ॥ सोमंप्रजापतिर्ऋतेनसत्यमिंद्रियंविपानंठशुक्रमंधसऽइंद्रस्येन्द्रियमिदंपयोमृतं मधु ॥ शुक्राय स्वाहा इदं शुक्राय० ॥ ६ ॥ शन्नोदेवीति मंत्रस्य दध्यङ्आथवर्णऋषिः शनिर्देवता गायत्रीछंदः शनिप्रीतये तिलधान्याज्यशमीसमिद्धोमे विनियोगः ॐ शन्नोदेवीरभिष्टय आपोभवंतुपीतये ॥ शंय्योरभिस्रवंतुनः ॥ शनैश्चराय स्वाहा इदं शनैश्चराय॥७॥कयानश्चित्रेति मंत्रस्यवामदेवऋषिः राहुर्देवता गायत्रीछंदःराहुप्रीतये तिलधान्याज्यदूर्वासमिद्धोमे विनियोगः॥ॐकयानश्चित्रआभुवदूती

बुधाय " बृहस्पतये० " से बृहस्पतये० "अन्नात्" से शुक्राय ' शन्नोदेवी० " शनैश्चराय " कयान० " से राहवे और,

सदावृधः सखा ॥ कयाशचिष्ठयावृता ॥ राहवे स्वाहा इदं राहवे० ॥ केतुंकृण्वन्निति मंत्रस्य मधुश्छंदाऋषिः केतुर्देवता गायत्रीछंदः केतुप्रीतये तिलधान्याज्याकुशसमिद्धोमे विनियोगः ॥ ॐ केतुंकृण्वन्नकेतवेपेशोमर्य्या अपेशसे ॥ समुषद्भिरजायथाः ॥ केतवे स्वाहा इदं केतवे० ॥ ९ ॥ ९२ ॥ अन्याश्च तिलाहुतयः ॥ ॐ अग्निंदूतंपुरोदधेहव्यवाहमुपब्रुवे ॥ देवाँ२॥ आसादयादिहस्वाहा ॥१॥ ॐ अप्स्वग्नेसधिष्टवसौषधीरनुध्यसे ॥ गर्भेसञ्जायसेपुनः स्वाहा ॥२॥ स्योनापृथिविनोभवा, नृक्षरानिवेशनी ॥ यच्छानः शर्मसप्रथाः स्वाहा ॥३॥ इदंविष्णुर्विचक्रमे त्रेधानिदधेपदम् ॥ समूढमस्यपाᳬंसुरेस्वाहा॥४॥ महाँ२॥ इंद्रोवज्रहस्तःषोडशीशर्मयच्छतु॥ हंतुपाप्मानंयोऽस्मान्द्वेष्टिस्वाहा ॥५॥ शुक्रज्योतिश्च चित्रज्योतिश्चसत्यज्ज्योतिश्चज्योतिष्मांश्च शुक्रश्चऋतपाश्चात्यᳬंहाःस्वाहा॥ ६ ॥ प्रजापतेनत्वदेवतान्न्यन्यो व्विश्वारूपाणिपरिताबभूव ॥ यत्कामास्तेजुहुमस्तन्नोऽअस्तुवयᳬंस्यामपतयोरयीणांस्वाहा ॥७॥ आयंगौः

" केतुंकृण्वं० " से केतवे स्वाहा कहकर आहुति दे ॥ ९२ ॥

उपरोक्त आहुतियां सब पदार्थोंकी अलग अलग थी किंतु अब आगे जितनी आहुतियां दी जायँगी वे तिलोंकीही होंगी । और वे सब मूलमें स्पष्ट हैं अतः मूल पाठ पढते हुए

पृश्निरक्रमीदसन्मातरंपुरः ॥ पितरंचप्रयन्त्वः स्वाहा ॥ ८ ॥ ब्रह्मजज्ञानंप्रथमंपुरस्ताद्विसीमतः सुरुचो व्वेन आवः ॥ सबुध्न्याउपमाअस्यविष्ठाः सतश्चयोनिमसतश्चव्विवः स्वाहा ॥ ९ ॥ अथाधिदेवानां मंत्रा ॥ ॐ त्र्यंबकंयजामहेसुगंधिंपुष्टिवर्द्धनम् ॥ उर्वारुकमिवबंधनान्मृत्योर्मुक्षीयमाऽमृतात् ॥ १ ॥ ॐ रुद्राय स्वाहा इदं रुद्राय ॥ ॐ श्रीश्च ते लक्ष्मीश्चपत्न्यावहोरात्रे पार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम् । इष्णन्निषाणामुम्मइषाणसर्वंलोकम्मऽइषाण ॥ २ ॥ ॐ श्रियै स्वाहा इदं० यदक्रंदः प्रथमं जायमानऽउद्यन्त्समुद्रादुतवापुरीषात् ॥ श्येनस्यपक्षाहरिणस्यबाहूउपस्तुत्यं महिजातंतेअर्वन् ॥ ३ ॥ ॐ स्कंदाय स्वाहा इदं० ॥ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदम् ॥ समूढमस्यपाꣳसुरे ॥ ४ ॥ विष्णवे स्वाहा इदं० ॥ ब्रह्मजज्ञानंप्रथमं पुरस्ताद्विसीमतः सुरुचोवेनऽआवः ॥ सबुध्न्याउपमाऽअस्यव्विष्ठाः सतश्चयोनिमसतश्चव्विवः ॥ ५ ॥ ॐ ब्रह्मणे स्वाहा इदं० ॥ त्रातारमिंद्रमवितारमिंद्रꣳहवेहवे सुहवꣳशूरमिंद्रम् ॥ ह्वयामिशक्रंपुरुहूतमिन्द्रꣳस्वस्ति नोमघवाधात्विंद्रः ॥६॥ ॐ इंद्राय स्वाहा इदं०॥यमायत्वामखायत्वासूर्यस्यत्वातपसेदेवस्त्वासविता मध्वानक्तु पृथिव्याः सꣳस्पृशस्पाहि ॥ आर्चिरसिशोचिरसि

तपोऽसि ॥ ७ ॥ ॐ यमाय स्वाहा इदं० ॥ कार्षिरसि
समुद्रस्यत्वाऽक्षित्याऽउन्नयामि ॥ समापो अद्भिरग्मत-
समोषधीभिरोषधीः ॥ ८ ॥ ॐ कालाय स्वाहा इदं
कालाय० ॥ ॐ चित्रावसोस्वास्तितेपारमशीय ॥ ९ ॥
ॐ चित्रगुप्ताय स्वाहा इदं० ॥ अथ प्रत्यधिदेवानां मंत्राः ॥
सनः पितेवसूनवेऽग्नेसूपायनो भव ॥ सचस्वानः स्वस्तये
॥ १ ॥ ॐ अग्नये स्वाहा इदं० ॥ अपोअद्यान्वचारि-
षर्ठ॑रसेनसमसृक्ष्महि ॥ पयस्वानग्न आगमंतम्मास॑ꣳसृज
वर्चसाप्रजयाचधनेनच ॥ १ ॥ ॐ अद्भ्यः स्वाहा
इदं० ॥ चिदसितयादेवतयांगिरस्वद्ध्रुवासीद ॥ परि-
चिदसितयादेवतयांगिरस्वद् ध्रुवासीद ॥ १ ॥ ॐ
पृथिव्यै स्वाहा इदं० ॥ इदंविष्णुर्विचक्रमेत्रेधा
निदधेपदम् ॥ समूढमस्यपाꣳसुरे ॥ १ ॥ ॐ विष्णवे
स्वाहा इदं० ॥ इंद्रऽआसान्नेताबृहस्पतिर्दक्षिणायज्ञः पुर
एतुसोमः ॥ देवसेनानाम भिभंजतीनां जयंतीनांमरुतो
यंत्वग्रम् ॥ १ ॥ ॐ इंद्राय स्वाहा इदं० ॥ इंद्रंदैवीर्विशो
मरुतोनुवर्त्मानोऽभवन्यथेंद्रं दैवीर्विशोमरुतोनुवर्त्मानो
भवन् ॥ एवमिमंयजमानंदैवीश्चविशोमानुषीश्चानुवर्त्मानो
भवंतु ॥ १ ॥ ॐ इंद्राण्यै स्वाहा इदं० ॥ प्रजापतेनत्वदेता-
न्यन्योविश्वारूपाणिपरिताबभूव ॥ यत्कामास्तेजुहुम-
स्तन्नोऽअस्तु वयꣳ स्याम पतयो रयीणाम् ॥ १ ॥

५

ॐ प्रजापतये स्वा इदं०॥ नमोस्तु सर्पेभ्योयेकेचपृथिवी-
मनु ॥येऽअंतरिक्षे येदिवि तेभ्यः सर्पेभ्योनमः ॥ १ ॥
ॐ सर्पेभ्यः स्वाहा इदं० ॥ ब्रह्मजज्ञानंप्रथमंपुरस्ताद्वि-
सीमतः सुरुचोव्वेनआवः॥सबुध्न्याउपमा अस्यव्विष्ठाः
सतश्चयोनिमसतश्चव्विवः ॥ १ ॥ ॐ ब्रह्मणे स्वाहा
इदं० ॥ अथ गणपंचकमंत्राः ॥ ॐ गणानांत्वा० ॥१॥
ॐ गणपतये स्वाहा इदं० ॥ जातवेदसेसुनवामसोममरा-
तीयतोनिदहातिवेदः ॥ सनः परिषदतिदुर्गाणिविश्वाना
वेवसिंधुंदुरितात्यग्निः ॥१॥ ॐ दुर्गायै स्वाहा इदं० ॥
वायोयेतसहस्त्रिणोरथासस्तेभिरागहि॥ नियुत्वान्त्सोम
पीतये ॥ १ ॥ ॐ वायवे स्वाहा इदं० ॥ घृतंघृतपा-
वानःपिबत व्वसांवसापावानः पिबतांतरिक्षस्यहविरसि
स्वाहा॥ दिशःप्रदिशऽआदिशोव्विदिशउद्दिशोदिग्भ्यः
स्वाहा ॥ १ ॥ ॐ अन्तरिक्षाय स्वाहा इदं० ॥
यावां कशामधुमत्यश्विनासूनृतावती ॥ तयायज्ञंमि-
मिक्षतम् ॥ १ ॥ ॐ अश्विभ्यां स्वाहा इदं० ॥ अथ
नक्षत्राणां मंत्राः ॥ अश्विनातेजसाचक्षुःप्राणेन सर-
स्वतीव्वीर्य्यंम् ॥ व्वाचेंद्रोबलेनेंद्रायदधुरिंद्रियम् ॥ १॥
ॐ दस्राय स्वाहा इदं ॥ यमायत्वामखायत्वा सूर्यस्य
त्वातपसेदेवस्त्वासवितामध्वानक्तुपृथिव्याः सꣳस्पृश
स्पाहि ॥ अर्चिरसि शोचिरसि तपोसि ॥१॥ ॐ भरण्यै

स्वाहा इदं० ॥ अयमग्निःसहस्रिणोवाजस्यशतिन-
स्पतिः ॥ मूर्द्धाकवीरयीणाम् ॥ १ ॥ ॐ कृत्तिकाभ्यः
स्वाहा इदं ब्रह्मजज्ञानंप्रथमंपुरस्ताद्विसीमतः सुरु-
चोव्वेनऽआवः ॥ सबुध्न्याउपमाअस्यव्विष्ठाःसतश्चयो-
निमसतश्चविवः ॥१॥ ॐ रोहिण्यै स्वाहा इदं रो० ॥
सोमोधेनुछंसोमोअर्वंतमाशुछंसोमोव्वीरंकर्मण्यं ददा-
ति ॥ सादन्यंव्विदथ्यठंसभेयंपितृश्रवणंयोददाशदस्मै
॥ १ ॥ ॐ मृगशिरसे स्वाहा इदं० ॐ नमस्तेरुद्र
मन्यवउतोतइषवेनमः ॥ बाहुभ्यामुततेनमः ॥ ॐ
आर्द्रायै स्वाहा इदं० ॥ अदितिर्द्यौरदितिरंतरिक्षमदि-
तिर्मातासपितासपुत्रः॥विश्वेदेवाअदितिःपंचजनाअदि-
तिर्जातमदितिर्जनित्वम् ॥१॥ ॐ आदितेयाय स्वाहा
इदं ॥ वाचस्पतयेपवस्वव्वाजिव्वृषाव्वृष्णोअठंशुभ्यां
गभस्तिपूतः॥देवोदेवेभ्य पवस्व येषां भागोसि ॥८॥ॐ
पुष्यायस्वाहाइदं॥ॐनमोस्तुसर्पेभ्योयेकेचपृथिवीमनु॥
येअंतरिक्षेयेदिवितेभ्यःसर्पेभ्योनमः ॥१॥ॐ आश्लेषायै
स्वाहा इदं० ॥ पितृभ्यःस्वधायिभ्यः स्वधानमःपिता-
महेभ्यःस्वधायिभ्यःस्वधानमः प्रपितामहेभ्यः स्वधा-
यिभ्यः स्वधानमःअक्षन्पितरोऽमीमदंतपितरोऽतीतृपंत
पितरःपितरः शुन्धध्वम् ॥ १ ॥ ॐ मघायै स्वाहा
इदं० ॥ भगप्रणेतर्भगसत्यराधोभगेमांधियमुदवाददन्नः॥

भगप्रणोजनयगोभिरश्वैर्भगप्रनृभिर्नृवंतः स्याम ॥ १ ॥
ॐपूर्वाफाल्गुन्यै स्वाहा इदं० ॥ दैव्यावध्वर्यू आगतꣳ
रथेनसूर्यत्वचा॥मध्वायज्ञꣳसमंजाथे ॥तम्प्रत्क्नथायंव्वे
नश्चित्रन्देवानाम् ॥ १ ॥ ॐ उत्तराफाल्गुन्यै स्वाहा
इदं० ॥ विभ्राड्बृहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञपता-
वविह्रुतम् ॥ व्वातजूतोयोअभिरक्षतित्मनाप्रजाः पुपोष
पुरुधाव्विराजति॥१॥ हस्ताय स्वाहा इदं०॥त्वष्टातुरी-
पोअद्भुतइंद्राग्नीपुष्टिवर्धना॥ द्विपदाछंदऽइंद्रियमुक्षागौ-
र्न्नव्वयोदधुः ॥ॐ॥ त्वष्ट्रे स्वाहा इदं०॥पीवोअन्नाꣳरयि-
वृधः सुमेधाः श्वेतः सिषक्तिनियुतामभिश्रीः ॥ तेवायवे
समनसोव्वितस्थुर्विश्वेन्नरः स्वपत्यानि चक्रुः ॥ १ ॥
ॐ वायव्याय स्वाहा इदं० इंद्राग्नी आगतꣳसुतंगी-
र्भिर्न्नभोव्वरेण्यम् ॥ अस्यपातंधियेषिता ॥ १ ॥ ॐ
विशाखायै स्वाहा इदं॥नमोमित्रस्यवरुणस्यचक्षसेमहो
देवायतदृतꣳसपर्यत ॥ दूरेदृशेदेवजातायकेतवेदिवस्पु-
त्रायसूर्यायशꣳसत ॥ १ ॥ ॐ अनुराधायै स्वाहा
इदं०॥सइषुहस्तैः सनिषंगिभिर्वशीसꣳस्रष्टासयुधइंद्रो-
गणेन॥ सꣳसृष्टजित्सोमपाबाहुशर्द्ध्युग्रधन्वाप्रतिहिता-
भिरस्ता॥१॥ ॐ ज्येष्ठायै स्वाहा इदं० ॥मातेवपुत्रंपृथि-
वीपुरीष्यमग्निꣳस्वेयोनावभारुखा॥ तांविश्वैर्देवैर्ऋतुभिः
संविदानःप्रजापतिर्विश्वकर्माविमुंचतु॥ॐमूलाय स्वाहा

इदं० ॥१॥अपाघमपकिल्बिषमपकृत्यामपोरपः अपा-
मार्गत्वमस्मदपदुःष्वप्न्यर्ठंसुव॥२॥ ॐपूर्वाषाढायैस्वाहा
इदं ॥ विश्वेऽअद्यमरुतोविश्वऽऊतीविश्वेभवंत्वग्नयः
समिद्धाः विश्वेनो देवाअवसागमंतुविश्वमस्तु द्रविणं
वाजोऽअस्मे ॥ १ ॥ ॐ उत्तराषाढायै स्वाहा इदं० ॥
तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि॥ धियोयोनः प्रचोद
यात् ॥ १ ॥ ॐ अभिजिते स्वाहा इदं० ॥ विष्णु-
र्विं० ॥ १ ॥ ॐश्रवणाय स्वाहा इदं० ॥ वसोः पवि-
त्रमसिशतधारंवसोः पवित्रमसिसहस्रधारम्॥ देवस्त्वास
वितापुनातुव्वसोः पवित्रेणशतधारेण सुप्प्वाकामधुक्षः॥
॥ १ ॥ ॐ धनिष्ठायै स्वाहा इदं० ॥ वरुणस्योत्तंभन
मसि० ॥ १ ॥ ॐ शतभिषायै स्वाहा इदं ॥ उतनो-
हिर्बुध्न्यः शृणोत्वजएकपात्पृथिवीसमुद्रः॥ विश्वेदेवा
ऋतावृधोहुवानास्तुतामंत्राः कविशस्ताऽअवंतु ॥१॥
ॐ पूर्वाभाद्रपदायै स्वाहा इदं ॥ शिवोनामासिस्वधि-
तिस्तेपितानमस्तेअस्तुमामाहिर्ठंसीः ॥निवर्तयाम्यायु-
षेन्नाद्यायप्रजननायरायस्पोषायसुप्रजास्त्वायसुवीर्याय
॥ १ ॥ॐउत्तराभाद्रपदायै स्वाहा इदं० ॥ पूषन्तवव्रते
व्वयन्नरिष्येमकदाचन ॥ स्तोतारस्तइहस्मसि ॥ १ ॥
ॐरेवत्यै स्वाहा इदं०॥अथ योगानां मंत्रः॥ योगयोगे
तवस्तरंवाजेवाजेहवामहे ॥ सखायइंद्रमूतये ॥ १ ॥

ॐ योगेभ्यः स्वाहा इदं० ॥ अथ कारणानां मंत्रः ॥ भद्रं कर्णेभिः शृणुयामदेवाभद्रंपश्येमाक्षभिर्यजत्राः ॥ स्थिरै रंगैस्तुष्टुवाᳬंसस्तनूभिर्व्यशेमहिदेवहितंयदायुः ॥ १ ॥ ॐ करणेभ्यः स्वाहा इदं० ॥ ध्रुवासिध्रुवोयंजमानोस्मि-न्नायतनेप्रजयापशुभिर्भूयात् ॥ घृतेनद्यावापृथिवीपूर्ये-थामिंद्रस्यच्छदिरसिव्विश्वजनस्यछाया ॥ १ ॥ ॐ ध्रुवाय स्वाहा इदं० पंचनद्यः सरस्वतीमपियंतिसस्रो-तसः ॥ सरस्वतीतुपंचधासोदेशेभवत्सरित् ॥१॥ ॐ नदीभ्यः स्वाहा इदं० ॥ सप्तऋषयः प्रतिहिताः शरीरे सप्तरक्षंतिसदमप्रमादम् ॥ सप्तापःस्वपतोलोकमीयुस्तत्र जाग्रतोअस्वप्नजौसत्रसदौचदेवौ ॥ १ ॥ ॐ सप्तऋषि-भ्यः स्वाहाइदं० ॥ इमंमेव्वरुण श्रुधीहवमद्याचमृडय ॥ त्वमावस्युराचके ॥ १ ॥ ॐ सप्तसागरेभ्यः स्वाहा इदं० ॥ प्रपर्वतस्यवृषभस्यपृष्ठान्नावश्चरंतिस्वसिचऽ-इयानाः ॥ ताऽआववृत्रन्नधरागुदक्ताअहिर्बुध्न्यमनुरी-यमाणाः ॥ विष्णोर्विक्रमणमसिव्विष्णोर्विक्रांतमसि व्विष्णोः क्रांतमसि ॥१॥ ॐ पर्वतेभ्यः स्वाहा इदं० ॥ जवोयस्तेव्वाजिन्निहितो गुहायः श्येनेपरीत्तोऽअचरच्च व्वाते॥ तेननोव्वाजिन्वलवान्वलेनव्वाजजिच्चभवशमने चपारयिष्णुः ॥ १ ॥ ॐ रैवताय स्वाहा इदं० ॥ सुप र्णोसिगरुत्मांस्त्रिवृत्ते शिरोगायत्रंचक्षुर्बृहद्रथंतरेपक्षौस्तोम

आत्माछन्दाᳬस्यंगानियजूᳬषिनामसामतेतनूर्वामदेव्यं यज्ञायज्ञियंपुच्छंधिष्ण्याःशफाः॥सुपर्णोसिगरुत्मान्दिवं गच्छ स्वः पत ॥ १ ॥ ॐ गरुडाय स्वाहा इदं० ॥ असंख्याताः सहस्राणियेरुद्राऽअधिभूम्याम् ॥ तेषाᳬ सहस्रयोजनेवधन्वानितन्मसि ॥१॥ ॐ रुद्राय स्वाहा इदं० ॥ ॐ वास्तोष्पतेप्रतिजानीह्यस्मान्स्वावेशोअन-मीवो भवानः ॥ यत्त्वेमहेप्रतितन्नोजुषस्वशन्नोअस्तुद्वि-पदेशंचतुष्पदे ॥१॥ अमीवहाव्वास्तोष्पतेविश्वारूपा-ण्याविशन् ॥ सखासुशेवऽएधिनः ॥ २ ॥ ॐ वास्तवे स्वाहा इदं० गणानांत्वा० ॥ ॐ गणपतये स्वाहा इदं० ॥ नमोस्तुसर्पेभ्योयेकेचपृथिवीमनु ॥ येअंतरिक्षे येदिवितेभ्यः सर्पेभ्योनमः ॥१॥ ॐ क्षेत्रपालायस्वाहा इदं० ॥जातवेदसेसुनवामसोममरातीयतोनिदहतिवेदः॥ सनःपरिपदतिदुर्गाणिविश्वानावेवसिंधुंदुरितात्यग्निः॥१॥ ॐ चामुंडायै स्वाहा इदं० ॥ योवः शिवतमोरसस्तस्य भाजयतेहनः । उशतीरिवमातरः ॥ॐ गौर्यादिमातृभ्यः स्वाहा इदं ० ॐ अग्निमीलेपुरोहितंयज्ञस्यदेवमृत्वि-जम् ॥ होतारंरत्नधातमम् ॥१॥ ॐ ऋग्वेदाय स्वाहा इदं० ॥ इषेत्वोर्जेत्वाव्यायवस्थदेवोवः सवितामार्पयतु श्रेष्ठतमायकर्मणऽआप्यायध्वमघ्न्याऽइंद्राय भागंप्रजा-वतीरनमीवा अयक्ष्मा मावस्तेन ईशतमाघशᳬसोध्रुवा

अस्मिन्गोपतौस्यातबह्वीर्यजमानस्यपशून्पाहि ॥ १ ॥
ॐ यजुर्वेदाय स्वाहा इदं०॥अग्नआयाहिवीतयेगृणानो
हव्यदातये ॥ निहोतासत्सिबर्हिषि ॥ १ ॥ साम-
वेदाय स्वाहा इदं० ॥ शन्नोदेवीरभिष्टयऽआपोभवंतुपी-
तये । शंय्योरभिस्रवंतुनः ॥ १ ॥ अथर्ववेदाय
स्वाहा इदं ॥ त्रातारमिंद्रमवितारमिंद्रꣳहवेहवेसुहवꣳ
शूरमिंद्रम् ॥ ह्वयामिशक्रंपुरुहूतमिंद्रꣳस्वस्तिनोमघवा
धात्विंद्रः ॥१॥ ॐ इंद्राय स्वाहा इदं० ॥ त्वन्नोअग्ने
तवदेवपायुभिर्मघोनोरक्षतन्वश्चवंद्य ॥ त्रातातोकस्यत-
नयेगवामस्यनिमेषꣳरक्षमाणस्तवव्रते ॥ १ ॥ ॐ
अग्नये स्वाहा इदं० ॥ सुगंनुपंथांप्रदिशन्नऽएहिज्योति-
ष्मद्धेह्यजरन्न आयुः ॥ अपैतुमृत्युरमृतंमआगाद्वैवस्वतो
नोअभयंकृणोतु ॥ १ ॥ ॐ यमाय स्वाहा
इदं० ॥ असुन्वंतमयजमानमिच्छस्तेनस्येत्यामन्विहि
तस्करस्य ॥ अन्यमस्मदिच्छासातइत्यानमोदेविनिर्ऋते
तुभ्यमस्तु ॥ १ ॥ ॐ नैर्ऋत्याय स्वाहा इदं० ॥तत्त्वा-
यामिब्रह्मणा व्वंदमानस्तदाशास्तेयजमानो हविर्भिः ॥
अहेडमानोव्वरुणेहबोध्युरुशꣳसमान आयुः प्रमोषीः
॥ १ ॥ ॐ वरुणाय स्वाहा इदं० ॥ आनोनियुद्भिः
शतिनीभिरध्वरꣳसहस्रिणीभिरुपयाहियज्ञम्॥व्वायोऽ-
अस्मिन्त्सवनेमादयस्वयूयंपातस्वस्तिभिः सदानः॥१॥

ॐ वायवेस्वाहा इदं० ॥ व्वयर्ठ᳭ंसोमव्रतेतवमनस्तनूषु बिभ्रतः ॥ प्रजावंतः सचेमहि ॥१॥ ॐ धनदाय स्वाहा इदं० ॥ तमीशानंजगतस्तस्थुषस्पतिं धियं जिन्वमवसे हूमहे व्वयम् ॥ पूषानोयथाव्वेदसामसद्वृधेरक्षितापायु- रदब्धः स्वस्तये ॥ १ ॥ ॐ ईशानाय स्वाहा इदं० ॥ अस्मेरुद्रामेहनापर्वतासोवृत्रहत्ये भरहूतौसजोषाः ॥ यशः ठ᳭ंसतेस्तुवतेधायिवज्रऽइंद्रज्येष्ठाऽअस्मा ᳭ंअवंतु देवाः ॥ १ ॥ ॐ अंतरिक्षाय स्वाहा इदं० ॥ स्योना पृथिविनोभवानृक्षरानिवेशनी ॥ यच्छानः शर्मसप्रथा ॥१॥ ॐ धरायै स्वाहा इदं० ॥ ॐ चतुःषष्टियोगि- नीभ्यः स्वाहा इदं०॥अथवा प्रणवादिनमोंतचतुर्थ्यंतः नामभिर्वा होमः ॥ ॐ भूतायत्वानारातयेस्वरभिवि- ख्येषंदृर्ठ᳭ंहंतां दुर्याः ॥ पृथिव्यामुर्वंतरिक्षमन्वेमिपृथि- व्यास्त्वाना भौसादयाम्यदित्याउपस्थेग्नेहव्यर्ठ᳭ंरक्ष॥१॥ ॐ पंचभूतेभ्यः स्वाहा इदं०॥विश्वकर्मन्हविषाव्वर्द्धनेन त्रातारमिंद्रमकृणोरवध्यम्॥तस्मै विशः समनमंतपूर्वी रयमुग्रोव्विहव्योयथासत् ॥१॥ ॐ विश्वकर्मणे स्वाहा इदं ॥ ततो यथासंख्यं प्रधानमंत्रेण जुहुयात् ॥ ततो लक्ष्मी होमः ॥ तंडुलाज्यशर्करापंचामृतद्रव्येण ॥ ॐ

वे देदी जाँय। ध्यान रहे कि तिलहोमके पीछे 'लक्ष्मी होम' केवल खीरसे होता है। और खीरमें घी खाण्ड मिले रहते हैं।

श्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेंनक्षत्राणिरूपमश्विनो
व्यात्तम् ॥ इष्णन्निषाणामुम्मइषाणसर्वंलोकम्मइषाण ॥
मनसः काममाकूतिंवाचः सत्यमशीमहि ॥ पशूनाꣳ
रूपमन्नस्यमयिश्रीःश्रयतांयशः स्वाहा ॥१॥ श्रीसूक्तेन
चरुहोमः ॥ ॐ हिरण्यवर्णांहरिणींसुवर्णरजतस्रजाम् ॥
चंद्रांहिरण्मयींलक्ष्मींजातवेदो ममावह स्वाहा ॥ १ ॥
तांमआवहजातवेदोलक्ष्मीमनपगामिनीम् ॥ यस्यांहिर-
ण्यंविंदेयंगामश्वंपुरुषानहम् ॥२॥ अश्वपूर्वांरथमध्यांह-
स्तिनादप्रबोधिनीम् ॥श्रियंदेवीमुपह्वयेश्रीर्मादेवीजुषताम
॥३॥ कांसोस्मितांहिरण्यप्राकारामार्द्रांज्वलंतींतृप्तांतर्प-
यंतीम् ॥ पद्मेस्थितांपद्मवर्णांतामिहोपह्वयेश्रियम् ॥४॥
चंद्रांप्रभासांयशसाज्वलंतींश्रियंलोकेदेवजुष्टामुदाराम् ॥
तांपद्मनेमिंशरणमहंप्रपद्येअलक्ष्मीर्मेनश्यतांत्वांवृणे॥५॥
आदित्यवर्णेतपसोधिजातोवनस्पतिस्तववृक्षोथबिल्वः॥
तस्यफलानितपसानुदंतुमायाऽन्तरायाश्चबाह्याअलक्ष्मीः
॥ ६ ॥ उपैतुमांदेवसख कीर्तिश्च मणिनासह ॥ प्रादुर्भू-
तोस्मिराष्ट्रेऽस्मिन्कीर्तिमृद्धिंददातु मे॥७॥क्षुत्पिपासा-
मलांज्येष्ठामलक्ष्मीनाशयाम्यहम् ॥ अभूतिमसमृद्धिंच
सर्वांनिर्णुदमेगृहात् ॥ ८ ॥ गंधद्वारांदुराधर्षांनित्यपुष्टां
करीषिणीम् ॥ईश्वरींसर्वभूतानांतामिहोपह्वयेश्रियम् ॥९॥
मनसः काममाकूतिंवाचः सत्यमशीमहि॥पशूनांरूपम-

न्नस्यमयिश्रीःश्रयतांयशः ॥१०॥ कर्दमेनप्रजाभूतामयि संभवकर्दम॥श्रियंवासयमेकुले मातरं पद्ममालिनीम् ॥ ॥११॥ आपः सृजंतु स्निग्धानि चिक्लीत वस मेगृहे ॥ निच देवीं मातरंश्रियंवासयमेकुले ॥१२॥आर्द्रांयष्क- रिणींयष्टिंपिंगलांपद्ममालिनीम्॥चन्द्रांहिरण्मयींलक्ष्मीं जातवेदोममावह ॥ १३ ॥ आर्द्रांपुष्करिणींपुष्टिंसुवर्णां हेममालिनीम् ॥ सूर्यांहिरण्यमयींलक्ष्मींजातवेदोममा- वह ॥ १४ ॥ तांमआवहजातवेदोलक्ष्मीमनपगामि- नीम्॥यस्यांहिरण्यंप्रभूतंगावोदास्योऽश्वान्विंदेयंपुरुषा नहम् ॥ १५ ॥ ९३ ॥ ततः सर्वेभ्योहविर्भ्यः स्विष्ट- कृद्धोमः ॥ ॐ अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते न मम ॥ ततो नवाज्याहुतयः ॐ भूः स्वाहा इदमग्नये ॥ १ ॥ ॐ भुवः स्वाहा इदं वायवे ॥ ॥२॥ ॐ स्वः स्वाहा इदं सूर्याय ॥ ३ ॥ ॐ त्वन्नो अग्नेव्वरुणस्यव्विद्वान्देवस्यहेडोअवयासिसीष्ठाः॥यजि- ष्ठोव्वह्नितमःशोशुचानो विश्वाद्वेषाꣳसि प्रमुमुग्ध्यस्म त्स्वाहा ॥४॥ इदमग्नीवरुणाभ्याम्॥ ॐसत्वन्नोअग्ने-

---

खीर न बने तो मावा या मेवासे होम करे ॥ ९३ ॥ यह हुए पीछे बचे हुए तिलादिको इकट्ठे करके " अग्नये स्विष्ट- कृते स्वाहा " कहकर सबको अग्निमें डाल दे। और फिर " ॐ भूः स्वाहा " आदिसे नौ आहुति घीकी देकर होमको

ऽवमोभवोतीनेदिष्ठोअस्याउषसोव्युष्टौ॥ अवयक्ष्वनोव्वरुणर्ठंरराणोवीहिमृडीकर्ठंसुहवोनऽएधि स्वाहा ॥ ५ ॥ इदमग्नीवरुणाभ्याम् ॥ॐअयाश्चाग्नेस्यनभिशस्तिपाश्चसत्यमित्वमयाऽअसि ॥ अया नोयज्ञंवहास्ययानोधेहिभेषजर्ठंस्वाहा ॥ ६ ॥ इदमग्नयेऽयसे ॥ ॐ येतेशतं वरुणं ये सहस्रंयज्ञियाः पाशावितता महांतः ॥ तेभिर्नोऽअद्यसवितोतविष्णुर्विश्वेमुंचंतुमरुत-स्वर्काःस्वाहा ॥७॥ इदंवरुणायसवित्रेविष्णवेविश्वेभ्योमरुद्भ्यस्वर्केभ्यश्च॥ ॐउदुत्तमंवरुणपाशमस्मदवाधमंविमध्यमर्ठंश्रथाय ॥ अथावयमादित्यव्रतेतवानागसोऽअदितयेस्यामस्वाहा॥ ॥८॥ इदंवरुणाय॥ ॐ प्रजापतये स्वाहा इदं प्रजापतये ॥९॥ होमांते ग्रहपूजनं कर्त्तव्यम्॥९४॥ ततो दिक्पाल-पूजनं बलिदानं च । माषभक्तदधिशष्कुलीदीपसहितेन बलिना पूजयेत् ॥ अथ बलिदानमंत्राः॥ अहोइन्द्रगजेन्द्रस्थ वज्रहस्त प्रपूजित ॥ त्रातारमिंद्रमंत्रेण प्राचीं रक्षतु

समाप्त करके ग्रहोंका फिर पूजन करे ॥ ९४ ॥ इसके पीछे होमकी वेदीके चारों ओर चारों दिशा और चारों कोनोंमें तथा एक ऊपर और एक नीचे यों दश जगह दश आसन (पत्ते) बिछाकर उन सबपर एकके दीपक और उडद दही भात शीरो पुडी बडा यह सब सामग्री प्रत्येक पर रखके उनपर कुछ सिन्दूर डालदे । और " अहो इन्द्र० " आदि

दिक्पते ॥ १ ॥ ॐ त्रातारमिंद्रमवितारमिंद्रठंहवेहवे सुहवठंशूरमिंद्रम् ॥ ह्वयामिशक्रंपुरुहूतमिंद्रठंस्वस्तिनोमघवाधात्विंद्रः ॥ २ ॥ पूर्वे इंद्राय नमः इंद्रस्यानुचरेभ्यो नमः भो इंद्र दिशं रक्ष बलिं भक्ष यजमानस्याभ्युदयं कुरु ॥ जमानस्यायुःकर्त्ता शांतिकर्त्ता पुष्टिकर्त्ता तुष्टिकर्त्ता वरदो भव ॥१॥ अहो सप्तार्चिमेषस्थ हव्यवाहन पूजित ॥ त्वन्नोअग्नेतिमंत्रेण रक्षाग्नय्यां दिशांपते ॥१॥ ॐ त्वन्नोअग्नेव्वरुणस्यविद्वान् देवस्यहेडोअवयासिसीष्ठाः॥ यजिष्ठोवह्नितमःशोशुचा नोव्विश्वाद्वेषाठंसिप्रमुमुग्ध्यस्मत् ॥२॥ आग्नेय्यामग्नेये नमः अग्नेरनुचरेभ्यो नमः दिशं० ॥ २ ॥ अहो महिषमारूढदंडपाणे वरप्रदः ॥ पूज्यः सुगन्नुपंथेति दक्षिणादिक्प्रपालकः ॥ १ ॥ ॐ सुगन्नुपंथांप्रदिशन्नएहिज्योतिष्मद्धेह्यजरन्नआयुः ॥ अपैतुमृत्युरमृतंमआगाद्वैवस्वतोनोअभयंकृष्णोतुस्वाहा ॥ २ ॥ दक्षिणे यमाय नमः यमस्यानुचरेभ्यो नमः दिशं० ॥३॥ अहो नैर्ऋति-दिक्पाल नैर्ऋत्यां खड्गधारकः ॥ आगच्छ कौशिकारूढ असुन्वन्तेति पूजितः ॥१॥ ॐ असुन्वंतमयजमानमिच्छस्तेनस्येत्यामन्विहितस्करस्य ॥ अन्यमस्मदिच्छसातइत्यानमोदेविनिर्ऋतेतुभ्यमस्तु ॥२॥ नैर्ऋत्यां निर्ऋतये नमः निर्ऋतेरनुचरेभ्यो नमः दिशं रक्ष०॥४॥

अहो वरुण दिक्पाल वारुण्यां मकरे स्थितः ॥ अर्चितः पाशहस्तश्च तत्त्वायामीति मंत्रतः ॥१॥ ॐ तत्त्वाया-मिब्रह्मणावंदमानस्तदाशास्तेयजमानो हविर्भिः ॥ अहे-डमानोव्वरुणेहबोद्ध्युरुशर्ठ्ठसमानआयुः प्रमोषीः ॥२॥ पश्चिमे वरुणाय नमः वरुणस्यानुचरेभ्यो नमः दिशं रक्ष० ॥५॥ अहोवायव्यदिक्पाल मृगपृष्ठं समाश्रितः आनोनियुद्भिर्मंत्रेण वायव्यां रक्ष पूजितः ॥ १ ॥ आनोनियुद्भिः शतिनीभिरध्वरर्ठ्ठ सहस्रिणीभिरुपयाहि यज्ञम्व्वायोअस्मिन्त्सवनेमादयस्वयूयंपातस्वस्तिभिः सदानः ॥ २ ॥ वायव्यां वायवे नमः वायोरनुचरेभ्यो नमः दिशं० ॥ ६ ॥अहो नरविमानस्थ गदापाणे वरः प्रद ॥ उत्तरां हि दिशं रक्ष वयं सोमेति पूजितः ॥१॥ ॐ व्वयर्ठ्ठसोमव्रतेतवमनस्तनूषु बिभ्रतः ॥ प्रजावंतः सचेमहि उत्तरे कुबेराय नमः कुबेरस्यानुचरेभ्यो नमः दिशं० ॥ ७ ॥ अहो वृषभमारूढ शूलपाणे वरप्रद ॥ रुद्राशां पूजितो रक्ष तमीशानेति मंत्रतः ॥१॥ॐतमीशानं जगतस्तस्थुषस्पतिंधियं जिन्वमवसे हूमहेव्वयम्॥ पूषानोयथाव्वेदसामसद्वृधेरक्षितापायुद-ब्धः स्वस्तये ॥२॥ ईशान्यामीशानाय नमः इशानस्या नुचरेभ्यो नमः दिशं रक्ष०॥८॥अहो हंसस्थितो ब्रह्मन्-व्योम रक्षतु दिक्पते ॥ कमंडलुधरःसाक्षी अस्मेरुद्रेति पूजितः ॥१०॥ ॐअस्मेरुद्रामेहनापर्वतासोवृत्रहत्येभर

हूतौसजोषाः ॥ यः शर्ठसतेस्तुवतेधायिपज्रऽइंद्रज्येष्ठा अस्माँअवंतुदेवाः ॥२॥ ॐ ऊर्ध्वं ब्रह्मणे नमः ब्रह्मणोऽनुचरेभ्यो नमः दिशं ० ॥ ९ ॥ अहो गरुडमारूढ शंखचक्रगदाधर ॥पालयाधोदिशं विष्णो स्योनापृथ्वीति मंत्रतः ॥ १ ॥ ॐ स्योनापृथिविनोभवानृक्षरानिवेशनी ॥ यच्छानः शर्मसप्रथाः ॥ २ ॥ अधः अनंताय नमः अनंतस्यानुचरेभ्यो नमः दिशं रक्ष० ॥ १० ॥ ॥ ९५ ॥ ततस्तैलपूरितचतुर्वर्तिप्रज्वलितदीपकसहितां माषभक्तदधिशष्कुलीवलिंशूर्पेपात्रे वाकृत्वानैर्ऋतीदिशं गत्वा—ॐ हिंकाराय स्वाहा हिंकृताय स्वाहा क्रंदते स्वाहाऽवक्रंदाय स्वाहा प्रोथते स्वाहा प्रप्रोथाय स्वाहा गंधाय स्वाहा घ्राताय स्वाहा निविष्टाय स्वाहोपविष्टाय स्वाहा संदिताय स्वाहा वल्गते स्वाहाऽऽसीनाय स्वाहा शयानाय स्वाहा स्वपते स्वाहा जाग्रते स्वाहा कूजते स्वाहा प्रबुद्धाय स्वाहा व्विजृंभमाणाय स्वाहा विचृत्ताय स्वाहा सर्ठहानाय स्वाहोपस्थि-

---

मंत्रोंसे पूर्वादि क्रमसे दशों दिशाओंमें इन्द्रादि दश दिक्पालोंको बलि प्रदान करे ॥ ९५ ॥ फिर एक दीपकमें तेल भरकर चार बत्ती जलाके उसको सूपमें या अन्य पात्रपर रखदे और उसमें भी उड़द दही आदि रखकर नैर्ऋत्य कोणमें जाके ॐ " हिंकाराय स्वाहा " आदि मंत्रोंसे क्षेत्रपालका आवाहनादि पूजन करके बलिदान

ताय स्वाहाऽऽयनाय स्वाहा प्रायणाय स्वाहा ॥१॥ यते स्वाहा धावते स्वाहोद्द्रावाय स्वाहोद्द्रुताय स्वाहा शूका-राय स्वाहा शूकृताय स्वाहा निषण्णाय स्वाहोत्थिताय स्वाहा जवाय स्वाहा बलाय स्वाहा विवर्त्तमानाय स्वाहा विवृत्ताय स्वाहा विधून्वानाय स्वाहा विधूताय स्वाहा शुश्रूषमाणाय स्वाहा शृण्वते स्वाहेक्षमाणाय स्वाहेक्षि-ताय स्वाहा व्वीक्षिताय स्वाहा निमेषाय स्वाहा यदत्ति तस्मै स्वाहा यत्पिबति तस्मै स्वाहा यन्मूत्रं करोति तस्मै स्वाहा कुर्वते स्वाहा कृताय स्वाहा ॥ २ ॥ कौलीरे चित्रकूटे हिमगिरिशिखरे कांतजालंधरे वा सौराष्ट्रे सिंधु-देशे मगधपुरवरे कौसले वा कलिंगे॥कर्णाटे कौंकणे वा भृगुषु पुरवरे कान्यकुब्जे स्थिता वा ते सर्वे यज्ञरक्षाकरण कृतधियः पांतु वः क्षेत्रपालाः ॥ १ ॥ द्वाभ्यां मंत्राभ्यां क्षेत्राधीशाय नमः क्षेत्राधीशस्यानुचरेभ्यो नमः दिशं० ॥२॥स्वपादौ प्रक्षाल्याचम्य द्यौः शांतिरंतरिक्षꣳशांतिः पृथिवीशांतिरापःशांतिरोषधयःशांतिर्वनस्पतयःशांति-र्विश्वेदेवाः शांतिर्ब्रह्म शांतिःसर्वꣳशांतिःशांतिरेवशांतिः सा मा शांतिरेधि द्विपदचतुष्पदेभ्यः शांतिरस्तु ॥ १ ॥ इति शांतिं कुर्यात् ॥ ९६ ॥ ततः पूर्णाहुतिं जुहुयात् ॥

देकर हाथ पाँव धो डाले और " द्यौः शान्तिः " से शान्ति करे ॥ ६९ ॥ " पूर्णाहुति " होमसंबंधी सब काम हुए

आज्यस्थाल्यामाज्यनिर्वापः॥ आज्याधिश्रयणंस्रुक्स्रुवौ प्रतप्य संमृज्य अभ्युक्ष्य पुनः प्रतप्य निदध्यात् ॥ तत आज्यमुद्वास्य उत्पूय अवेक्ष्य अपद्रव्यनिरसनं स्रुचमादाय चतुर्गृहीतमाज्यं कृत्वा स्रुवैश्चतुर्भिर्गृहीतं पूरयित्वा नालिकेरं च घृतेन पूरयित्वा कुंकुमेन पूजयित्वा कौसुंभवस्त्रेण वेष्टयित्वा सूत्रेण च वेष्टयित्वा स्रुचं धृत्वा तदुपरि पूगीफलं च धृत्वा नालिकेरस्य मुखमात्मनः सम्मुखं कृत्वा विवाहे अग्निसम्मुखं कृत्वा जुहुयात् ॥ पूर्णाहुत्यां मृडनाम्ने वैश्वानराय इदं गंधं पुष्पं धूपं दीपं नैवेद्यं आचमनम्॥एकोनपंचाशन्मरुद्गणेभ्यो नमः गंधं पुष्पं धूपं दीपं नैवेद्यं आचमनम् ॥ ९७ ॥ ततस्तां स्रुचं गृहीत्वोत्थाय घृतेनाविच्छिन्नधारयाऽग्नौ पातयेत् ॥

पीछे आज्यस्थालीमें घी डालकर तपावे । स्रुक् स्रुवको तपाकर साफ करके जलसे धोकर फिर तपाके साफ करले स्रुक्को लेकर उसमें स्रुवसे चार बार शुद्ध घी भरे और एक नारियलको छेद करके उसमेंभी घी भरकर उसपर लाल वस्त्र लपेटके रोलीसे पूजकर उसको स्रुक्में रखदे और इन दोनोंके ऊपर स्रुव तथा सुपारी रखकर पहले तो 'पुर्णाहुत्यां मृडनाम्ने० ' से अग्निका और फिर " एकोनपंचाशन्मरुद्गणेभ्यो नमः० " सेस्रुक्स्रुवस्थ मरुद्गणोंका पूजन करे ॥ ९७ ॥ फिरस्रुक्को लेखिनीकी भाँति पकड़कर खड़ा होजाय और उसमेंसे घीकी अविच्छिन्न धारा अग्निमें टपकाता हुआ

मूर्द्धानमिति मंत्रस्य भारद्वाजऋषिः वैश्वानरोदेवता त्रिष्टुप् छंदः पूर्णाहुतिहोमे विनियोगः ॥ ॐ मूर्द्धानं दिवोअरतिं पृथिव्यावैश्वानरमृतआजातमग्निम् । कविर्ठ॰संम्राजमतिथिं जनानामासन्नापात्रं जनयंतदेवाः ॥ १ ॥ पूर्णादर्विपरापतसुपूर्णापुनरापत ॥ व्वस्नेवव्विक्रीणावहाऽइषमूर्जर्ठ॰शतक्रतो ॥ २ ॥ चित्तिंजुहोमिमनसाघृतेनयथादेवाइहागमन्वीतिहोत्राऽऋतावृधः ॥ पत्येविश्वस्यभूमनोजुहोमि विश्वकर्मणेव्विश्वाहादाभ्यर्ठ॰हविः ॥ ३ ॥ सप्ततेअग्ने समिधः सप्तजिह्वाः सप्त ऋषयः सप्त धाम प्रियाणि ॥ सप्तहोत्राःसप्तधात्वायजतिसप्तयोनीरापृणस्वाघृतेनस्वाहा ।४।शुक्रश्चज्योतिश्चचित्रज्योतिश्चसत्यज्योतिश्चज्योतिष्मांश्चशुक्रश्चऋतपाश्चात्यर्ठ॰हाः ॥ ५ ॥ ईदृङ् चान्यादृङ्चसदृङ्चप्रतिसदृङ्च॥मितश्चसम्मितश्चसभराः॥६॥ ऋतश्चसत्यश्चध्रुवश्चधरुणश्चधर्त्ताचविधर्त्ताचव्विधारयः ॥७॥ ऋतजिच्चसत्यजिच्चसेनजिच्चसुषेणश्चांतिमित्रश्चदूरे अमित्रश्चगणः॥८॥ईदृक्षासऽएतादृक्षासऽऊषुणःसदृक्षासः प्रतिसदृक्षासऽएतन ॥ मितासश्चसम्मितासोनोऽअद्यसभरसोममरुतोयज्ञेऽअस्मिन् ॥९॥स्वतवांश्चप्रघासीचसांतपनश्चगृहमेधीच ॥ क्रीडीचशाकीचोज्जेषी ॥ १० ॥

" ॐ मूर्द्धानं दिवो ० " आरंभ करके " संतु यजमानस्य कामाः " पर्यन्त पढ़कर श्रीफलको यजमानके सन्मुख

उग्रश्च भीमश्चध्वांतश्चधुनिश्च ॥ सासह्वांश्चाभियुग्वाच िविक्षिपः स्वाहा ॥११॥ पुनस्त्वाऽऽदित्या रुद्राव्वसवः समिंधतां पुनर्ब्ब्रह्माणोव्वसुनीथयज्ञैः॥घृतेनत्त्वंतन्वंव्वर्द्ध-यस्वसत्याः संतुयजमानस्यकामाः ॥ १२ ॥ इति पठित्वा यजमानस्य कामाः सत्याः संतु इति श्रीफलं यजमानाभिमुखं जुहुयात्॥घृतं च रुद्रकलशे त्यजेत् ॥ इदमिंद्राय न मम ॥ पूर्णाहुतिं हुत्वोपविश्य ॥ ९८ ॥ स्रुवेण भस्मानीय दक्षिणकरानामिकया गृहीतभस्मना त्र्यायुषं कुर्यात् ॥ ॐ त्र्यायुषं जमदग्नेरिति ललाटे ॥ ॐकश्यपस्यत्र्यायुषमिति ग्रीवायाम्॥ॐयद्देवेषुत्र्यायु-षमिति दक्षिणबाहुमूले ॥ ॐ तन्नोऽअस्तुत्र्यायुषमिति हृदि ॥ एवं त्र्यायुषं कुर्यात् ॥ परकर्तृके तत्ते इति वि-शेषः ॥९९॥ ततोऽग्न्युपस्थानम्॥ ॐ इद्रंदैवीर्व्विशो-मरुतोनुवर्त्मानोऽभवन्यथेंद्रंदैवीर्विशोमरुतोऽनुवर्त्मा-नोऽभवन् ॥ एवमिमंयजमानंदैवीश्चव्विशोमानुषीश्चा-नुवर्त्मानोभवंतु ॥ १ ॥ इमंछंस्तमूर्जस्वंतंधयापां

करके होमदे और शेष घीको रुद्रकलशमें छोड़कर बैठ जाय ॥ ९८ ॥ फिर स्रुवसे भस्म लेकर ' त्र्यायुषं जमदग्नेः ' से यजमानके ललाटपर ' कश्यपस्य त्र्यायुषं ' से ग्रीवाके ' यद्दे-वेषु त्र्यायुषं ' से दहने भुजके और ' तन्नो अस्तु त्र्यायुषं ' से हृदयपर लगावे ॥ ९९ ॥ “ अग्न्युत्थापन ” फि

प्रपीनमग्नेसरिरस्यमध्ये॥उत्संजुषस्व मधुमंतमर्व्वन्त्समु
द्रियर्ठ०सदनमाविशस्व ॥२॥ घृतं मिमिक्षेघृतमस्ययोनि
घृतेश्रितोघृतम्वस्यधाम ॥अनुष्वधमावमादायस्वस्वाहा
कृतंवृषभव्वक्षिहव्यम् ॥३॥समुद्रादूर्म्मिर्मधुमाँउदारदुपा
ठ०शुनासममृतत्वमानट् ॥ घृतस्यनामगुह्यंयदस्तिजि
ह्वादेवानाममृतस्यनाभिः ॥ ४ ॥ व्वयन्नाम प्रब्रवामा
घृतस्यास्मिन्यज्ञेधारयामानमोभिः ॥ उपब्रह्माश्शृणव-
च्छस्यमानं चतुःशृंगोवमीद्गौरएतत ॥ ५ ॥ चत्वारि
शृंगात्रयोअस्यपादाद्वेशीर्षेसप्तहस्तासोअस्य ॥ त्रिधाब
द्धोवृषभोरोरवीति महोदेवोमर्त्याँठ०आविवेश ॥ ६ ॥
त्रिधाहितंपणिभिर्गुह्यमानिङ्गविदेवासो घृतमन्वविंदन्॥
इंद्रऽएकर्ठ०सूर्य्यएकंजजानव्वेनादेकर्ठ०स्वधयानिष्टतक्षुः॥
॥७॥एताऽअर्षंतिहृद्यात्समुद्राच्छतव्रजारिपुणानावचक्षे॥
घृतस्यधाराअभिचाकशीमिहिरण्ययोव्वेतसो मध्यआ-
साम् ॥ ८ ॥ सम्यक्स्रवंतिसरितोनधेनाऽअंतर्हृदामनः
सापूयमानाः॥ एतेअर्षंत्यूर्मयोघृतस्यमृगाइवक्षिपणोरी-
षमाणाः ॥ ९ ॥ सिंधोरिवप्राध्वनेशूघनासोव्वातप्रमियः
पतयंतियह्वाः ॥ घृतस्यधाराअरुषोनव्वाजीकाष्ठाभिंद-
न्नूर्मिभिः पिन्वमानः॥ १० ॥ अभिप्रवन्तसमनेवयोषा-
कल्याण्यः स्मयमानासो अग्निम् ॥ घृतस्यधाराःसमिधो
नसततान्जुषाणोहर्य्यंतिजातवेदाः ॥ ११ ॥ कन्याइव

व्वहतुमेतवाउऽअंज्यंजानाअभिचाकशीमि ॥ यत्रसोमः सूयतेयत्रयज्ञोघृतस्यधारा अभितत्पवंते ॥१२ ॥ अ-भ्यर्षंतसुष्टुतिंगव्यमाजिमस्मासुभद्राद्रविणानिधत्त॥इमं यज्ञन्नयतदेवतानोघृतस्य धारामधुमत्पवंते ॥ १३ ॥ धामंतेविश्वंभुवनमधिश्रितमंतःसमुद्रे हृद्यंतरायुषि ॥ अपामनीकेसमिथेयऽआभृतस्तमश्याम मधुमंतंतऽऊ-र्मिम् ॥ १४ ॥ चतुर्भिश्चचतुर्भिश्च द्वाभ्यां पंचभिरेव च ॥ हूयते च पुनर्द्वाभ्यां तस्मै यज्ञात्मने नमः ॥१५॥ज्ञानतो-ऽज्ञानतो वापि मंत्रकर्मक्रियाविधिः ॥ संपूर्णं कुरु यज्ञेश गार्हपत्य नमोऽस्तु ते ॥ १६ ॥ यथा शस्त्रप्रहाराणां कवचं भवति वारणम् ॥ तद्वद्देवापघातानां शांतिर्भ-वति वारणम् ॥ १७ ॥ स्वस्ति श्रद्धां यशः प्रज्ञां विद्यां बुद्धिं श्रियं बलम् ॥ आयुष्यं चैवमारोग्यं देहि मे वांछितं फलम् ॥ १८ ॥ यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ॥ न्यूनं संपूर्णतां याति सद्यो वंदे तमच्युतम् ॥ १९ ॥ कायेन वाचा मनसेंद्रियैर्वा बुद्ध्या-त्मना वानुसृतस्वभावात् ॥ करोमि यद्यत्सकलं पर-स्मै नारायणायेति समर्पयामि ॥ २० ॥ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् ॥ स्मरणादेव तद्विष्णोः

' इन्द्रंदैवी० " से " धामन्ते० " तक वैदिक और "चतु-र्भिश्च चतुरर्भिश्च " से ' प्रमादात्कुर्वतां ' पर्यंत पौराणिक

संपूर्णं स्यादिति श्रुतिः ॥ २१ ॥ ॐ यज्ञपुरुषाय नमः ॥ १०० ॥ ततो होमसंकल्पः ॥ ॐ तत्सदद्य मासे पक्षे तिथौ अमुकगोत्रेणामुकशर्मणा मया आघारादि-पूर्णाहुतिपर्यंतं यद्यद्द्रव्यं यावद्यावत्संख्याकेन येन येन मंत्रेण यया यया कामनया यस्यै यस्यै देवतायै हुतं सा सा देवता प्रीयताम् ॥ ते देवाः शांतिदाः पुष्टिदा-स्तुष्टिदा वरदा भवंतु ॥ग्रहजापकेभ्योग्रहतुष्ट्यै दानानि देयानि ॥ ततः संस्रवप्राशनं आचमनम् ॥ १०१ ॥ ॐ तत्सदद्यास्मिन्ग्रहमखहवनकर्मणि कृताकृतावेक्षण-रूपब्रह्मकर्मप्रतिष्ठार्थं न्यूनातिरिक्तदोषपरिहारार्थं च इदं पूर्णपात्रं सहिरण्यं प्रजापतिदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय ब्रह्मणे तुभ्यमहं संप्रददे ॥ ॐ स्वस्तीति प्रतिवचनम् ॥ ततो ब्रह्मग्रंथिविमोकः ॥ ततः ॐ सुमित्रियानआपओषधयःसंतु(इति पवित्राभ्यां प्रणीता-

---

मंत्रोंसे स्तुति पाठ करके पुष्पाक्षतोंसे अग्निका विसर्जन करे ॥ १०० ॥ इसके पीछे होमसंबंधी दान द्रव्योंका संकल्प करके ग्रहोंके जप करनेवालोंको दान दे । और संस्रव अर्थात् वह घी जो प्रोक्षणमें होम करते समय छोड़ा गया था उसको भक्षण करे अथवा सूंघे ॥ १०१ ॥ " दान " फिर ' ॐ तत्सदद्यास्मिन्ग्रहयज्ञे० ' से पूर्णपात्रका संकल्प करके ब्राह्म-णको देकर ब्रह्माकी गाँठ खोलदे । और ' सुमित्रियानसे० '

जलमानीय तेन शिरः सम्मृज्य) ॐ दुर्म्मित्रियास्त-स्मैसंतुयोस्मान्द्वेष्टियंचवयंद्विष्मः॥इत्यैशान्यांप्रणीता-न्युब्जीकरणं पवित्रे अग्नौ प्रक्षिपेत् ॥ १०२ ॥ ततः स्तरणक्रमेण बर्हिरुत्थाप्याज्येनाभिघार्य ॐ देवागातु-विदोगातुंवित्वागातुमित ॥ मनसस्पतइमंदेवयज्ञᳬस्वाहा वातेधाःस्वाहा ॥१॥ इति मंत्रेण बर्हिर्होमः॥ ततः नमोब्रह्मणेनमोअस्त्वग्नयेनमः पृथिव्यैनमओषधीभ्यः॥ नमोवाचेनमोवाचस्पतयेनमोविष्णवेबृहतेकरोमि॥इति मंत्रेणाग्निं त्रिः पर्युक्ष्य तज्जलेन नेत्रस्पर्शनम् ॥ १०३॥ ततःशुक्लांबरधरःशुक्लमाल्यानुलेपनोयजमानःआचा-र्यादीन् गंधमाल्यादिभिरभ्यर्च्याचार्याय ब्रह्मणे ऋत्वि-ग्भ्यश्च वित्तानुसारेण दक्षिणां दद्यात् ॥ तत्र प्रयोगः ॥ ॐ तत्सदद्य मासे पक्षे तिथौ वासरे अमुकगोत्रोऽमुक-शर्मा (वर्मा गुप्तो वा) अहं अस्य नवग्रहमखकर्मणः

शिरपर कुछ जल छिड़ककर ' ॐ दुर्मित्रिया॰ 'से प्रणीताको ईशानमें औंधा करदे। और पवित्रेको अग्निमें पटकदे॥१०२॥ इसके पीछे वेदीके चौतर्फ बिछी हुई दर्भाको उसी क्रमसे उठाकर घीमें भिगोके ' देवागातु॰ ' से उसको होम दे। और नमो ब्रह्मणे॰ ' से अग्निको अर्घ्यकी भाँति तीन बार जल देकर उसी जलसे अपने नेत्र स्पर्श करे ॥ १३० ॥ इसके पीछे यजमान स्वच्छ वस्त्र गंधादि धारण करके आचार्य

सांगतासिद्धचर्थं असुकगोत्रायामुकप्रवरायामुकवेदस्या-मुकशाखाध्यायिनेऽमुकशर्मणे ब्राह्मणायाचार्याय इमां दक्षिणां तुभ्यमहं संप्रददे ॥ इत्येवं ब्रह्मणे ऋत्विग्भ्यश्च दक्षिणां दद्यात् ॥ ततः न्यूनातिरिक्तदोषपरिहारार्थं नवग्रहमखकर्मसांगतासिद्धचर्थमिदं पात्रं घृतपूरितं यथानामगोत्राय ब्राह्मणाय दक्षिणां दातुमहमुत्सृजे॥ एवं तंडुलतिलशर्करापात्राणि दद्यात् ॥ न्यूनातिरिक्तदोषपरिहारार्थंनवग्रहमखकर्मसांगतासिद्धचर्थंयथानामगोत्रेभ्योब्राह्मणेभ्योभूयसींदक्षिणां विभज्य दातुमुत्सृजे॥ ततो यजमानः अन्यानपि ब्राह्मणान् वित्तानुसारेण गोभूहिरण्यान्नरत्नानां दानादिभिः पूजयेत् ॥ १०४ ॥ ततोऽभिषेकः ॥ यजमानं सपत्नीकं सपुत्रं प्रागभिमुखमासीनं आचार्यः ऋत्विजश्च रुद्रकलशात् कुशदूर्वापल्लवैरुदकमानीयाभिषिंचेयुः ॥ ॐ ॥ आपोहिष्ठामयोभुव-

---

आदिका गंधादिसे पूजन कर उनको वित्तानुसार यथायोग्य दक्षिणा दे । और ४ पात्रोंमें तंडुल तिल शक्कर और घी भरकर गंधादिसे पूजके वे भी ब्राह्मणोंको दे । इसके सिवाय अन्न वस्त्र गौ भू सुवर्ण और ब्राह्मण भोजनादि जो कुछ देयद्रव्य हो वह सब दे ॥ १०४ ॥ " अभिषेक " इसके पीछे स्त्री पुत्र सहित यजमानको पूर्वाभिमुख बैठाकर आचार्य अथवा ऋत्विज रुद्रकलशमेंसे जल लेकर दर्भा दूर्वा या आमके पत्तोंसे अभिषेक करें । अर्थात् " आपोहिष्ठा० " आदि २४

स्तानऊर्ज्जेदधातन ॥ महेरणायचक्षसे ॥ १ ॥ योवः शिवतमोरसस्तस्यभाजयतेहनः॥उशतीरिवमातरः॥२॥ तस्माअरंगमामवोयस्यक्षयायजिन्वथ ॥ आपोजनयथा चनः ॥ ३ ॥ ञ्वरुणस्योत्तंभनमसि० ॥ ४ ॥ भगप्रणे- तर्भगसत्यराधोभगेमांधियमुदवाददन्नः ॥ भगप्रणोजन- यगोभिरश्वैर्भगप्रनृभिर्नृवंतःस्याम॥५॥इदमापःप्रवहता- वद्यंचमलंचयत्॥यच्चाभिदुद्रोहानृतंयच्चशेपेअभीरुणम्॥ आपोमातस्मादेनसः पवमानश्चमुंचतु ॥ ६ ॥ समुद्रा- यत्वाञ्वातायस्वाहासरिरायत्वा ञ्वातायस्वाहा॥अनाधृ- ष्यायत्वाञ्वातायस्वाहाप्रतिधृष्यायत्त्वाञ्वातायस्वाहा॥ अवस्यवेत्वाञ्वातायस्वाहासिमिदायत्वाञ्वाताय स्वाहा ॥७॥ पुनंतुमादेवजनाः पुनंतुमनसाधियः॥पुनंतुञ्विश्वा भूतानिजातवेदः पुनीहिमा॥८॥आप्यायस्वसमेतुतेञ्वि- श्वतः सोमवृष्ण्यम् ॥ भवाञ्वाजस्यसंगथे ॥ ९ ॥ शिरो मेश्रीर्यशोमुखंत्विषिः केशाश्वश्मश्रूणि ॥ राजामेप्राणो- अमृतॐसम्राट्चक्षुर्विराट्श्रोत्रम् ॥ १० ॥ जिह्वामेभद्रं वाङ्महोमनोमन्युः स्वराड्भामः ॥ मोदाः प्रमोदाऽ अंगुलीरंगानिमित्रंमेसहः ॥ बाहूमेबलमिंद्रियॐहस्तौमे कर्मञ्वीर्यम् ॥ आत्माक्षत्रमुरोमम ॥ ११ ॥ पृष्टीर्मेरा- ष्ट्रमुदरमॐसौग्रीवाश्वश्श्रोणी॥ ऊरूअरत्नीजानुनीञ्वि-

शोमेंऽगानिसर्वंतः ॥ १२ ॥ नाभिर्मेचित्तंविज्ञानंपायुर्मे-
ऽपचितिर्भसत् ॥ आनंदनंदावांडौमेभगः सौभाग्यंपसः॥
जंघाभ्यांपद्भ्यांधर्मोस्मिविशिराजाप्रतिष्ठितः ॥ १३॥
पयः पृथिव्यां० ॥१४॥ देवस्यत्वासवितुः प्रसवेश्विनो-
र्बाहुभ्यां पूष्णोहस्ताभ्याम् ॥ सरस्वत्यै व्वाचोयंतुर्यंत्रिये
दधामि बृहस्पतेष्ट्वासाम्राज्येनाभिषिंचाम्यसौ ॥ १५ ॥-
देवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्याम्॥
सरस्वत्यैव्वाचोयंतुर्यंत्रेणाग्नेःसाम्राज्येनाभिषिंचामि॥१६
देवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्याम् ।
अश्विनोर्भैषज्येनतेजसेब्रह्मवर्चसायाभिषिंचामि॥सरस्व
त्यैभैषज्येनव्वीर्यायान्नाद्यायाभिषिंचामींद्रस्यैंद्रियेणबलाय
श्रियैयशसेऽभिषिंचामि॥१७॥पालाशंभवतितेनब्राह्मणो
भिषिंचतिब्रह्मवैपलाशोब्रह्मणैवैनमेतदभिषिंचति॥१८॥
सर्वेषांवाएषवेदानाᳬंरसोयत्सामसर्वेषामेवैनमेतद्वेदाना-
ᳬंरसेनाभिषिंचति ॥ १९ ॥ यद्वेवकल्पान्जुहोतिप्राणावै
कल्पाअमृतमुवैप्राणाऽअमृतेनैवैनमेतदभिषिंचति॥२०॥
दीर्घायुत्वायबलायवर्चसेसुप्रजास्त्वायचासाअथो जीव
शरदः शतम् ॥ २१ ॥ द्यौः शांतिरंतरिक्षᳬंशांतिः
पृथिवीशांतिरापः शांतिरोषधयः शांतिः ॥ वनस्पतयः
शांतिर्विश्वेदेवाः शांतिर्ब्रह्मशांतिः॥ सर्वᳬंशांतिः शांति-

रेवशांतिःसामाशांतिरेधि॥द्विपदचतुष्पदेभ्यःशुभशांति-भंवतु ॥ २२ ॥ श्रीर्वर्चस्वमायुष्यमारोग्यमाविधात्पव-मानंमहीयते ॥ धनंधान्यं पशुंपुत्रलाभंशतसंवत्सरंदीर्घ-मायुः ॥ २३ ॥ विश्वानिदेवसवितर्दुरितानिपरासुव ॥ यद्भद्रंतन्नऽआसुव ॥ २४ ॥ शक्राद्या देवताः सर्वा ब्रह्म-विष्णुमहेश्वराः ॥ सुरास्त्वामभिषिंचंतु प्रयच्छंतु धनानि च ॥ १ ॥ नारायणो जगन्नाथस्तथा संकर्षणो विभुः ॥ प्रद्युम्नश्चानिरुद्धश्च ऋद्धिंयच्छंतु ते सदा ॥ २ ॥ इंद्रो वह्निर्यमश्चैव नैर्ऋतो वरुणस्तथा ॥ वायुः कुबेरो रुद्रश्च दिक्पालाः पांतु वः सदा ॥३॥ आदित्य-श्चन्द्रमा भौमो बुधो जीवः सितोऽर्कजः ॥ ग्रहास्त्वाम-भिषिंचंतु राहुः केतुस्तथैव च ॥ ४ ॥ आदित्या वसवो रुद्रा विश्वेदेवामरुद्गणाः ॥ लोकपालाः प्रयच्छंतु मंग-लानि प्रियं यशः ॥ ५ ॥ नारदाद्या ऋषिगणा ये चान्ये च तपोधनाः ॥ भवंतु यजमानस्य आशीर्वादपरायणाः ॥ ६ ॥ गायत्री चैव सावित्री शची लक्ष्मीः सरस्वती ॥ मृडानी मातरः सर्वा भवंतु वरदास्तव ॥ ७ ॥ कीर्ति-र्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः ॥ बुद्धिर्लज्जा वपुः शांतिस्तुष्टिः क्षांतिस्त्रयोदश ॥ ८ ॥ एतास्त्वा-मभिषिंचंतु देवपत्न्यः समावृताः ॥ देवदानवगंधर्वा यक्ष-

राक्षसपन्नगाः ॥ ९ ॥ ऋषयो मानवा गावो देवमातर एव च ॥ देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसां गणाः ॥ १० ॥ अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च ॥ औषधानि च रत्नानि कालस्यावयवाश्च ये ॥ ११ ॥ सरितः सागराः शैलास्तीर्थानि जलदा नदाः ॥ एते त्वामभिषिंचंतु सर्वकार्यार्थसिद्धये ॥ १२ ॥ इत्यभिषेकः ॥ १०५ ॥ अभिषेकानंतरं पुण्याहवाचनं केचित्पठंति केचित्तु वरणश्राद्धानंतरम् ॥ अतः पूर्वपठितं चेदत्रापि आब्रह्मन्० शतंजीवशरदोवर्धमानः श्रीर्वर्चस्वमित्याद्याशीर्मंत्रान् पठित्वा मंत्राक्षतान् यजमानहस्ते दद्यात् दोषाभावात् ॥ १०६ ॥ यजमानोऽपि कृतैतद्ग्रहयज्ञकर्मणो यन्न्यूनमतिरिक्तं तत्सर्वं भवतां ब्राह्मणानां

वैदिक और " शक्राद्या० आदि १२ पौराणिक मंत्रोंको पढ़ते हुए ब्राह्मण लोग जलमें दूर्वांकुरादि भिगोभिगोकर यजमानके शरीर परछिड़कते रहें ॥ १०५ ॥ "समाप्ति" कई एक अभिषेक के अनन्तर भी पुण्याहवाचन पढ़ते हैं किन्तु पहले पुण्याहवाचन हो चुका है इसलिये अब " आब्रह्मन्० " " शतंजीवशरदो० " ', श्रीर्वर्चस्व० " इत्यादि आशीर्वादात्मक मंत्रोंको पढ़कर पुष्पाक्षत यजमानको देदेवे ॥ १०६ ॥ और यजमान " कृतैतत्० " से जल छोड़कर ' वृद्धिशतानि

वचनात् श्रीविष्णोर्ग्रहाणां च प्रसादात् विधिवत् परि-
पूर्णमस्तु ॥ वृद्धिशतानि भवंतु इति प्रार्थयेत् ॥ तत
उत्थाय क्षम्यतामित्युक्त्वा अग्निं ग्रहांश्च प्रदक्षिणीकृत्य
वेदीसमीपे गत्वा श्रीफलं निवेद्य क्षमाप्य नमस्कृत्य
सूर्यादीन्विसर्ज्जयेत् ॥ १०७ ॥ तत्र मंत्राः—ॐ
समुद्रं गच्छ स्वाहांतरिक्षं गच्छ स्वाहा देवᳪंसवितारं
गच्छस्वाहा मित्रावरुणौ गच्छस्वाहाऽहोरात्रे गच्छस्वाहा
छंदाᳪंसिगच्छस्वाहाद्यावापृथिवीगच्छस्वाहायज्ञंगच्छ
स्वाहासोमंगच्छस्वाहादिव्यंनभोगच्छस्वाहाऽग्निंवैश्वानरं
गच्छस्वाहामनोमेहार्दियच्छदिवंतेधूमोगच्छतुस्वर्ज्योतिः
पृथिवींभस्मनापृण स्वाहा ॥ १ ॥ उत्तिष्ठब्रह्मणस्पते
देवयंतस्त्वेमहे॥ उपप्रयंतुमरुतः सुदानवऽइंद्रप्राशूर्भवा
स चा ॥ २ ॥ यांतु देवगणाः सर्वे पूजामादाय याज्ञि-
कीम् ॥ इष्टकामसमृद्ध्यर्थं पुनरागमनाय च ॥३ ॥ इति

भवंतु ' यह प्रार्थना करके उठ खड़ा हो और ब्राह्मणोंसे
क्षमा माँगकर अग्नि और ग्रहोंकी प्रदक्षिणा करके वेदीके
समीप जाकर श्रीफलादि भेंट करे और उनको नमस्कार करके
पुष्पाक्षत लेकर " ॐ समुद्रं गच्छ० " आदि मंत्रोंका उच्चा-
रण करके देवताओंका विसर्जन करे ॥ १०७ ॥ और

पठित्वा मंत्राक्षतान् मंडलोपरि क्षिपेत् ॥ ततो ब्राह्मणान्संभोज्य तदनुज्ञातः कुटुंबजनैः परिवृतो भोजनं कुर्यात् ॥ १०८ ॥

इति ग्रहशांतिप्रयोगः समाप्तिमगात् ॥

फिर तिलक छात आरती आदि करनेके अतिरिक्त ब्राह्मण-भोजन कराके उनकी आज्ञासे आप भोजन करे इस प्रकार यह कार्य आनन्दपूर्वक समाप्त करे । इति शुभम् ॥ १०८ ॥

इति श्रीमल्लक्ष्मीनारायणात्मज हनुमान् शर्मा लिखित
भाषेतिकर्तव्यतासहित ग्रहशान्तिपद्धति समाप्त ।

हमारे प्रकाशनों की अधिक जानकारी व खरीद के लिये हमारे निजी स्थान :

खेमराज श्रीकृष्णदास
अध्यक्ष : श्रीवेंकटेश्वर प्रेस,
९१/१०९, खेमराज श्रीकृष्णदास मार्ग,
७ वी खेतवाडी बॅक रोड कार्नर,
मुंबई - ४०० ००४.
दूरभाष/फैक्स-०२२-२३८५७४५६.

खेमराज श्रीकृष्णदास
६६, हडपसर इण्डस्ट्रियल इस्टेट,
पुणे - ४११ ०१३.
दूरभाष-०२०-२६८७१०२५.
फैक्स -०२०-२६८७४९०७.

गंगाविष्णु श्रीकृष्णदास,
लक्ष्मी वेंकटेश्वर प्रेस व बुक डिपो
श्रीलक्ष्मीवेंकटेश्वर प्रेस बिल्डींग,
जूना छापाखाना गली, अहिल्याबाई चौक,
कल्याण, जि. ठाणे, महाराष्ट्र - ४२१ ३०१
दूरभाष/फैक्स- ०२५१-२२०९०६१.

खेमराज श्रीकृष्णदास
चौक, वाराणसी (उ.प्र.) २२१ ००१.
दूरभाष - ०५४२-२४२००७८

हमारे प्रकाशनों की अधिक जानकारी व खरीद के लिये हमारे निजी स्थान

खेमराज श्रीकृष्णदास
अध्यक्ष : श्रीवेंकटेश्वर प्रेस,
९१/१०९, खेमराज श्रीकृष्णदास मार्ग,
७ वी खेतवाडी बॅक रोड कार्नर,
मुंबई - ४०० ००४.
दूरभाष/फैक्स-०२२-२३८५७४५६.

खेमराज श्रीकृष्णदास
६६, हडपसर इण्डस्ट्रियल इस्टेट,
पुणे - ४११ ०१३.
दूरभाष-०२०-२६८७१०२५,

गंगाविष्णु श्रीकृष्णदास,
लक्ष्मी वेंकटेश्वर प्रेस व बुक डिपो
श्रीलक्ष्मीवेंकटेश्वर प्रेस बिल्डींग,
जूना छापाखाना गली, अहिल्याबाई चौक,
कल्याण, जि. ठाणे, महाराष्ट्र - ४२१ ३०१
दूरभाष - ०२५१-२२०९०६१.

खेमराज श्रीकृष्णदास
चौक, वाराणसी (उ.प्र.) २२१ ००१
दूरभाष - ०५४२-२४२००७८.

KHEMRAJ SHRIKRISHNADASS